
# 1. मम विद्यालयः

एषः मम विद्यालयः । मम विद्यालयः अतीव विशालः । अत्र द्वादशश्रेण्यः सन्ति। अस्मिन् विद्यालये सहस्रं छात्राः पठन्ति। शतम् अध्यापकाः अध्यापिकाः च कार्यं कुर्वन्ति। विद्यालयस्य वातावरणम् अतीव आनन्दप्रदम् अस्ति। विद्यालये रसायन-भौतिक- संगणक-विभागाः सन्ति।

अस्माकम् विद्यालये
विशालम्
क्रीडाक्षेत्रम् अस्ति



अस्माकं विद्यालये विशालः
पुस्तकालयः अपि अस्ति।

छात्राः प्रातः प्रार्थनां कुर्वन्ति।





ते क्रीडाक्षेत्रे क्रीडन्ति।


केचित् छात्राः कन्दुकेन क्रीडन्ति, केचन च यष्टिकाभिः खेलन्ति अन्ये धावन्ति अपरे च उत्पतन्ति।







पुस्तकालये छात्राः पुस्तकानि तूष्णीम् पठन्ति।

मम विद्यालये ध्वनिमुद्रिका, ध्वनिग्राहकम्, ध्वनिविस्तारकयन्त्रम्, प्रक्षेपण-यन्त्रम्, दूरदर्शन-यन्त्रं कृष्णफलकं च अस्ति।





दूरदर्शन-यन्त्रं


ध्वनिविस्तारकयन्त्रम्

अस्माकं विद्यालये सुन्दरम् उपवनम् अस्ति।

अत्र अनेकानि पुष्पाणि सन्ति।





मालाकारः उपवनं रक्षति। वयम् उपवने अन्यैः छात्रैः सह पाठं पठामः व्यायामं कुर्मः क्रीडामः च।

# अनुशीलनम्

1. **उत्तरं शुद्धं चेत् 'आम्', अशुद्धं चेत् 'न' इति लिखत।**

    (i) किं तव विद्यालयः विशालः अस्ति? आम्

    (ii) किं चित्रे शिक्षिका चित्र लिखति? ☐

    (iii) किं पुस्तकालये छात्राः खेलन्ति? ☐

    (iv) किं विद्यालयस्य पुरतः क्रीडाङ्गणम् अस्ति? ☐

    (v) किम् आचार्यः छात्रान् ताडयति? ☐

    (vi) किं केचन बालाः यष्टिकन्दुकैः क्रीडन्ति? ☐

2. **अधोलिखित – प्रश्नानाम् उत्तराणि एकपदेन लिखत।**

    (i) विद्यालयः कीदृशः अस्ति?

    (ii) विद्यालयस्य वातावरणं कीदृशम् अस्ति?

    (iii) विद्यालये कीदृशः पुस्तकालयः अस्ति?

    (iv) उपवने यूयम् अन्यैः छात्रैः सह किं कुरुथ?

    (v) विद्यालये कति छात्राः सन्ति?

3. **पाठं पठित्वा निम्नलिखितानां प्रश्नानाम् उत्तराणि एकेन वाक्येन वदत लिखत च।**

(i) विद्यालये कति श्रेण्यः सन्ति?

(ii) छात्राः कुत्र तूष्णीं पठन्ति?

(iii) विद्यालयस्य उपवनं कः रक्षति?

(iv) शिक्षिका कृष्णफलके किं करोति?

(v) विद्यालये प्रार्थना कदा भवति?

4. **रेखाङ्कित-पदम् आधृत्य प्रश्ननिर्माणं कुरुत।**

(i) <u>विद्यालये</u> संगणक-विभागः अस्ति।

(ii) छात्राः <u>क्रीडाक्षेत्रे</u> क्रीडन्ति।

(iii) विद्यालये <u>उपवनम्</u> अस्ति।

(iv) <u>प्रधानाचार्यः</u> गुणवान् अस्ति।


(v) अध्यापकः <u>छात्रान्</u> न ताडयति।


5. **विपरीतार्थक-पदेन सह मेलनं कुरुत।**

| | क | ख |
|---|---|---|
| (i) | नूतनम् | दुःखम् |
| (ii) | तूष्णीम् | पुरातनम् |
| (iii) | सुखम् | लघुः |
| (iv) | विशालः | उच्चैः |


6. प्रदत्त-चित्रेषु के किं कुर्वन्ति इति वदत लिखत च।










7. किं युष्माकं विद्यालये एतानि वस्तूनि सन्ति?





यथा आम्, अस्ति न अस्ति ..........................






८.  अधः प्रदत्तां सारणीं पठत। तदनु समयविषयकं कालांशम् अधिकृत्य प्रदत्तानां प्रश्नानाम् उत्तराणां च मेलनं कुरुत।

| **प्रश्नाः** | | **उत्तराणि** | |
|---|---|---|---|
| 1. | प्रातः अष्टवादने छात्राः किं कुर्वन्ति? | 1. | सार्ध-दशवादने विश्रान्तिवेला अस्ति। |
| 2. | सामूहिक-गानं कदा भवति? | 2. | पादोन-द्विवादने छात्राः जीवविज्ञानं पठन्ति। |
| 3. | संस्कृत-कालांशः कदा अस्ति? | 3. | आम् छात्राः सार्धनववादने रसायनशास्त्रं पठन्ति। |
| 4. | सार्ध-द्वादशवादने छात्राः किं कुर्वन्ति? | 4. | सपादद्विवादने इतिहासस्य कालांशः अस्ति। |
| 5. | सार्ध-दशवादने किम् अस्ति? | 5. | सामूहिक-गानं सपाद-द्वादशवादने भवति। |
| 6. | छात्राः पादोनद्विवादने किं पठन्ति? | 6. | त्रिवादने क्रीडासमयः भवति। |
| 7. | किं छात्राः पादोन-एकादशवादने भौतिकं पठन्ति? | 7. | प्रातः अष्टवादने छात्राः प्रार्थनां कुर्वन्ति। |
| 8. | क्रीडासमयः कदा भवति? | 8. | सार्धद्वादशवादने छात्राः भोजनं कुर्वन्ति। |
| 9. | किं छात्राः सार्ध-नववादने रसायन-शास्त्रं पठन्ति? | 9. | आम्, पादोन-एकादशवादने छात्राः भौतिकं पठन्ति। |
| 10. | इतिहासस्य कालांशः कदा अस्ति? | 10. | संस्कृतकालांशः सार्ध-अष्टवादने अस्ति। |